National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(60): 132-133
© 2025 NJHSR
www.sanskritarticle.com

**Dr.S.Murali**
Asst.Prof.in Jyotisha,
Madras Sanskrit College,
Chennai-04

**Correspondence:**
**Dr.S.Murali**
Asst.Prof.in Jyotisha,
Madras Sanskrit College,
Chennai-04

# बृहज्जातके महापुरुषयोगाः

**Dr. S. Murali**

प्रत्यक्षशास्त्रमिति विख्याते ज्योतिषे विद्यमान होरास्कन्धे ग्रहबलेन जातकबलं निर्णीय जीवानां सुखदुःखबोधः सिद्ध्यति। ग्रहाणां बलनिरूपणे बहून् विषयान् प्रतिपादयन्ति अस्मत् पूर्वजाः आचार्याः। यथा चान्द्रयोगः, नाभसयोगः, राजयोगः, सन्यासयोगः, इत्यादयः। प्रतिपादितेषु ग्रहबलबोधकयोगेषु पञ्चमहापुरुषयोगः अन्यतमः वर्तते। केचन आचार्याः योगमिमं राजयोगेन सह निरूपयन्ति। यथा जातकपारिजाते आचार्याः अमुम् विचारं राजयोगविचारसन्दर्भे विचारयन्ति। परन्तु सारावलीकाराः पञ्चमहापुरुषयोगाध्यायः इति पृथक् विचारयन्ति। यद्यपि सारावल्यां पृथक् विचारः वर्तते तथापि राज्ञां पञ्चमहापुरुषलक्षणानहं प्रतिपादयामि इति सारावलीकाराः अध्यायोपक्रमसमये सूचयन्ति। तद्यथा-

**श्रीदेवकीर्तिराजा पञ्चमहापुरुषलक्षणान्नृपतीन्।**
**कथयति यांस्तानहमपि कथयामि निराकुलीकृत्य॥**[1]इति

महापुरुषयोगेताराग्रहाणामेव कारकत्वं वदन्ति अर्थात् ताराग्रहाः नियमितस्थानेषु भूत्वा केन्द्रगताः भवन्ति चेत् महापुरुषयोगाः सिद्ध्यन्ति। पञ्चमहापुरुषयोगलक्षणं वदन्त्येवं,

मूलत्रिकोणनिजतुङ्गगृहोपयाता भौमज्ञजीवसितभानुसुता बलिष्ठाः।
केन्द्रस्थिता यदि तदा रुचभद्रहंसमालव्यचारुशशयोगकरा भवन्ति॥[2]

**स्वक्षेत्रे च चतुष्टये च बलिभिः स्वोच्चस्थितैर्वा ग्रहैः**
**शुक्राङ्गारकमन्दजीवशशिजैरेतैर्यथानुक्रमम्।**
**मालव्यो रुचकः शशोऽथ कथितो हंसश्च भद्रस्तथा**
**सर्वेषामपि विस्तरं मतिमतां सक्षिप्यते लक्षणम्॥**[3]

कुजादि ताराग्रहाः स्वोच्चे अथवा स्वक्षेत्रे भूत्वा केन्द्रस्थानं प्राप्नुवन्ति तर्हि महापुरुषयोगः इति सारावलीकाराणां उक्तिः। जातपारिजातकारास्तु मूलत्रिकोणराशिमपि अङ्गीकुर्वन्ति। यथा स्वोच्चे, स्वक्षेत्रे अथवा मूलत्रिकोणराशौ विद्यमानाः यदि केन्द्रस्थाः तर्हि महापुरुषयोगः इति।

मङ्गलः रुचकयोगकर्ता, ज्ञः भद्रयोगकर्ता, बृहस्पतिः हंसयोगकर्ता, सितः मालव्ययोगकर्ता, शनिः शशयोगकर्ता च भवन्ति।

एतादृश महापुरुषयोगान् मिहिराचार्याः स्वीये बृहज्जातके यद्यपि साक्षात् नैव विचारितवन्तः तथापि तैः प्रतिपादितयोगेषु महापुरुषयोग लक्षणान् द्रष्टुं वयं शक्नुमः। आचार्याः ग्रन्थारम्भे "अर्थभहुलं शास्त्रप्लवं प्रारभे" इति उपदिशन्ति। तेनाधारेण राजयोगाध्याये मिहिराचार्यैः प्रतिपादितविषयेषु महपुरुषयोगाणां चिन्तनं कुर्मः।

यदा कुजः मेषवृश्चिककमकरेषु अन्यतमगो भूत्वा लग्नात् १,४,७,१० केन्द्रस्थानेषु भवति तदा रुचकनाम महापुरुषयोगः। अयं रुचकयोगः बृहज्जातके कथं प्रतिपादितं वर्तते चेत्।

झषे सेन्दौ लग्ने घटमृगेन्द्रेषु सहितैः-

**यमारार्के योऽभूत्स खलु मनुजः शास्ति वसुधाम्।**

**अजे सारे मूर्तौ शशिगृहगते चामरगुरौ**

**सुरेज्ये वा लग्ने धरणिपतिरन्योऽपि गुणवान्॥**[4]

इत्यस्मिन् श्लोके अजे सारे मूर्तौ इत्यनेन वाक्येन लग्ने स्वक्षेत्रे मेषे कुजः, कर्कटके गुरुः इति ग्रहावस्था यदि भवति तर्हि स राजो भवति इति वदन्ति। अत्र केवलं "अजे सारे मूर्तौ" वाक्येन अस्मिन् राजयोगे रुचकयोगः अपि आचार्यैः प्रतिपादितो वर्तते।

यदा बुधः मिथुनकन्ययोरन्यतमे स्थित्वा केन्द्रम् अलङ्करोति तदा भद्र योगः। एवं गुरुः धनुर्मीनयोः अथवा स्वोच्चराशौ कर्कटके भूत्वा केन्द्रं प्राप्नोति तदा हंस योगः च सिद्ध्यति। एतौ द्वावपि योगौ बृहज्जातके एकेन श्लोकेन निरूपितौ स्तः। तद्यथा-

**हये सेन्दौ जीवे मृगमुखगते भूमितनये**

**स्वतुङ्गस्थौ लग्ने भृगुजशशिजावत्र नृपती।**

**सुतस्थौ वक्रार्की गुरुशशिसिताश्चापि हिबुके**

**बुधे कन्या लग्ने भवति हि नृपोऽन्योपि गुणवान्॥**[5]

श्लोकेस्मिन् सुतस्थौ वक्रार्की इत्येषा पङ्क्तिः भद्रयोगं सूचयति। लग्नात् पञ्चमे कुजशनी, एवं लग्नात् चतुर्थे गुरुशशिशुक्राश्च भवन्ति। एवं विद्यमाने सति यदि बुधः कन्यालग्नमेति तर्हि भद्र योगः। लग्ने स्वक्षेत्रे स्वोच्चे च विद्यमानः बुधः अत्र भद्रयोगकर्ता वर्तते। तथैव श्लोकस्य आदिमपङ्क्तौ गुरुकृतहंसयोगं सूचयन्ति। धनुर्राशौ चन्द्रसहितः गुरुः भवेत्, मकरराशेः प्रथमभागे कुजः भवेत् अपि च शुक्रबुधौ स्वोच्चे स्थित्वा लग्नं यदि प्राप्नुवन्ति तर्हि राजयोगः इति वाक्यस्य अर्थः। अत्र शुक्रोच्च मीनराशिः यदि लग्नं भवति तर्हि लग्नात् दशमे स्वक्षेत्रे धनुर्राशौ गुरुः भवति, एवमेव बुधोच्च कन्याराशिः यदि लग्नं भवति तर्हि लग्नात् चतुर्थे स्वर्क्षे धनुर्राशौ भवति उभयत्र केन्द्रे स्वक्षेत्रे च वर्तते इति कृत्वा अत्र हंसयोगं आचार्याः सूचयन्तीति ज्ञायते।

श्लोकेस्मिन् स्वतुङ्गस्थौ लग्ने भृगुजशशिजावत्र नृपती " इति वाक्येन क्रमशः बुधशुक्रकृत भद्र एवं मालव्ययोगं सूचयन्ति।

**स्वर्क्षे शुक्रे पातालस्थे धर्मस्थानं प्राप्ते चन्द्रे।**

**दुश्चिक्याङ्गप्राप्तिप्राप्तैः शेषैर्जातः स्वामी भूमेः॥**[6]

इत्यस्मिन् श्लोके आचार्याः शुक्रकृत मालव्ययोगं सूचयन्ति। शुक्रः स्वराशौ भूत्वा यदि लग्नात् चतुर्थं स्थानं प्राप्नोति तर्हि राजयोगः इति श्लोकस्य अर्थः। अत्र वृषभतुलयोः अधिपतिः शुक्रः, अतः एतौ राशी कस्मात् चतुर्थौ भवतः सः लग्नं भवेत्। एवं सति कुम्भकर्कटकयोरन्यतमात् लग्नात् चतुर्थे स्वर्क्षे यदि शुक्रः भवति तर्हि मालव्ययोगः सम्भवः भवति।

**वृषेसेन्दौ लग्ने सवितृगुरुतीक्ष्णांशुतनयैः**

**सुहृज्जायाखस्थैर्भवति नियमान्मानवपतिः।**

**मृगे मन्दे लग्ने सहजरिपुधर्मव्ययगतैः**

**शशाङ्काद्यैः ख्यातः पृथुगुणयशाः पुङ्गलपतिः॥**[7]

अनेन श्लोकेन शनिकृत शशयोगं सूचयन्त्याचार्याः। वृषभलग्ने चन्द्रः, तृतीये सूर्यः, सप्तमे गुरुः, दशमे अर्थात् कुम्भराशौ शनिः च यदि भवन्ति तर्हि राजयोगः इति श्लोकार्थः। अत्र लग्नात् दशमे केन्द्रे स्वक्षेत्रे विद्यमानः शनिः शशयोगं उत्पादयति। तथैव मृगे मन्दे लग्ने इत्यनेन वाक्येनाऽपि शशयोगः सूचितो वर्तते अत्र।

एवमेव इतोपि बृहज्जातकगत केषुचित् श्लोकेषु महापुरुषसाधर्म्यं वर्तते। अन्येषु ग्रन्थेषु राजयोगात् पृथक् विचारितोयं महापुरुषयोगः बृहज्जातके वराहमिहिराचार्यैः राजयोगेन सहैव निरूपितो वर्तते इत्यत्र विशेषः।

**संदर्भ ग्रन्थ**

[1]सारावली अ.37. श्लो 1

[2]जातकपारिजात अ. 7. श्लो.59

[3]सारावली अ.37. श्लो 2

[4]हज्जातकम् अ.11. श्लो 8

[5]हज्जातकम् अ.11 श्लो 7

[6]हज्जातकम् अ.11 श्लो.15

[7]हज्जातकम् अ 11.श्लो.6